M. T. B. COLLEGE, SURAT
Manuscripts Library

No. Ref. / Ser. 724

Title: Bhashya-
Work on Mimansa

Z

	Bhashya.	Title.
	Some Works on मीमांसा	Author.
		Editor.
		Year, Vols.
SK		Publisher.
Mimansa	Incomplete	Remark.
924		

776

776

॥श्रीगणेशायनमः॥उक्तंसमाम्नायेदमर्थ्यंतस्मान्नूसर्वंतदर्थंस्यात्॥ एवंस्मृतिसहितस्यप्रामाण्ये
सिद्धेधुनावाक्यार्थव्याख्यानावसरेसत्यपरिसमाप्येवप्रमाणलक्षणेकेनसंबंधेननामधेयविनायाःप्र
स्तावःक्रियते॥ केचित्तावदाहुः॥ किमुहिहादयोगुणस्यप्रमाणमुतक्रियाणमेवनामधेयत्वेनेति॥
तदयुक्तं॥ एवंसतिहिसमस्तमेववेदस्यप्रमाणलक्षणादिनिश्चयात्॥ सर्वत्रखल्वपिप्रेक्षावतेकिमित्त
वामस्यार्थस्यप्रमाणमुतास्मेति॥ येपिचएतेदेवतादयोपिसूत्रेपूर्वोत्तरपदोपरिकल्पोकार्थिकरणत्वेन
व्याचक्षतेतैरप्युक्तंसमाम्नायेदमर्थ्यमित्यनेनसूत्रेणकेः सिद्धतानुमितेनः पूर्वपक्षानुयुक्तोर्थो
निधीयतइतिवक्तव्यं॥ नह्येकंकेदमर्थ्यंतन्नार्थवचनमुहिहादीनामनिष्टं॥ तस्मात्तयोरधिक
रणयोरनुमितपूर्वपक्षयोरुत्तरपक्षसूत्रद्वयमितिमाख्येयं॥ तत्रप्रथमतावदुहिहादीनुद्दाहस्य
संदेहः क्रियतोकिमेतेकंचिद्धर्मंप्रत्युपयोगंगच्छंतिउतनेति॥ किंप्राप्तं॥ आम्नायस्यक्रियार्थत्वा
दित्यानर्थक्यं॥ आहचअंगंहिवेदप्रमाणत्वाउहिहादितोधिकं॥ धर्मायानुपयुक्तार्थमानर्थक्यं
प्रपद्यते॥ नह्येतेविध्यादिवत्तन्नवंति॥ साध्यसाधनेतिकर्तव्यतानिधायित्वान्नावश्चोदनाद्यन्त
र्गतिबुध्यनावादर्थवादातिरेकः॥ कर्मांगभूतेवंसंज्ञकप्रकाशयितृछायान्नावाच्चकार्यनिवृत्तिः
नचातोन्यद्वेदप्रयोजनमस्तीत्यप्रमाणमेवेजानीयकाशंते॥ अत्रोच्यते॥ सर्वस्मित्रविद्या

गत्वाद्वेदस्योक्तेनहेतुना॥ उहिहाद्यप्रमाणत्वमतिरेकान्नसिध्यति॥ यदातदर्थंत्रायान्यतमार्थमितिस्थि
तंतदाविचारःकिमर्थमिति॥ नतावदर्थवादत्वं॥ वाक्यशेषत्वाभावात्॥ कथंपुनरुद्गानवाक्यशेषोयावा
तास्यावुर्वेक्षोपिहेत्यादिवदेकवाक्यतावगम्यते॥ नैतदस्तिविधातव्यस्पर्हियः शेषुसवाक्यशेषः सोय
वादोऽयंतुविध्युद्देशदेवतातिरिक्तस्यवाक्यशेषस्तत्संनिधिनश्चस्तुप्रयोगित्वंनबुध्यतइत्युद्गातृ
उंबराधिकरणे॥ नवैकपदात्मकतिदृष्टा॥ नचेहतांप्रतिपद्यामहोयदप्युरुदंपशूनामनेनक्रियते
इत्येवंप्रधानस्यप्रकर्म्योतदपितृतीयांतसमुदायाश्रयबलवन्नारकरणत्वंप्रसिध्यावोधते॥ अन्यथा
हिप्रातिपदिकार्थप्राधान्याद्वायुर्वैक्षेपिष्ठेतिवत्प्रत्ययमेवप्रायोक्ष्यता॥ नचास्यमंत्रवत्तावृप्येणप्रती
तेरध्येतृस्मरणभावाच्च॥ नवैकपदात्वात्साकांक्षत्वं॥ करणत्वप्रतीत्यावोस्मारकत्वं॥ नचैतदनिधे
यः कश्चित्प्रयोगसमवायार्थोदृष्टपतेनचासमवेतप्रकाशनेकमंगत्वं॥ मांत्रवर्णिकप्रत्यक्षकल्प
नायामप्यतिगौरवं॥ नचास्यहेत्वाकांक्षानियोजिकाश्रुतिरस्तियेनमांत्रवर्णिककल्पनास्या
त्॥ नवैदृष्टंप्रयोगार्हं॥ अतश्चाविनियुक्तत्वादिषेत्वेत्यादिवन्नाध्याहारेणनिराकांक्षीकृत्यप्रयोगः
स्फुटंचप्रातरणेनैकवाक्यत्वमित्यमंत्रत्वं॥ तस्माद्धि शुद्देवंनृगंतस्येवोत्तराधिकरणेनविचार्यते
गुणविधिनामधेयमिति॥ १॥ तत्रनाचस्त्रसिद्धेर्वेदवत्वेनप्रयोजनवशेनच॥ अधिकत्वात्प्रवृत्तेश्च

गुणनूपविधीयते॥ मातिपदिकोतावद्भेदनसमर्थेन शब्देनविनादावर्थप्रतिपत्तावगम्यते॥ नच सुसुदा योर्नरवावीलोकेप्रसिद्धः॥ सर्वलोकाधिनवगतोयोवेदेदेवावगम्यते॥ संबंधस्यानुग्रहकर्तृत्वात् तृतीयापिच करणवाचिनीक्रियायाश्चसाधनशक्तिमनुभवंतद्वाराक्रियाकरणेनोक्तिसाधनकोमागोविज्ञायते॥ नचयागस्योक्तिकरणत्ववाप्रसिद्धं॥ अथवेत्वानुग्रहकृत्तिविशेषकरत्वविधायकेऽस्मदपुनुषाणेप्रवृत्तेर्विशेषः॥ अन्यथाह्यनुवृत्तिरनर्थकैवप्रवृत्तिरेवोस्यात्॥ अथवाप्रसिद्धत्वानुगुणविधेरेवत्वमभिधेयवत्वंनामधेयत्वेत्वर्थोनज्ञायतइतियोज्यते॥ अथवानेदेनार्थवत्वंहेतुरुक्तिसदृस्ययजितः फलांतरवत्वात्॥ ननश्चविधिपुनुष्ययोःप्रवृत्तिविशेषइतिवाच्यं॥ ननुनामधेयेपिकर्तुविशिष्टदर्थवत्प्रवृत्तिविशेषकरत्वमस्तु॥ नैतस्तिकुतः॥ आकृतेरविधेयत्वात् धातुनाव्यक्तिरुक्तिता॥ सावनाशभिधीयेतजातिश्चैनैवनामता॥ यदातावेक्रतुनैवलक्षणयाविधिविषयत्वयोग्यत्वाद्यागविशेषःप्रतिपाद्यतेतदाकिमपरंतत्रनामाकरिष्यते॥ अथसामान्यमात्रमभिधीयेतनतत्स्यानिष्टमेवेतन्नामेत्यसंबद्धत्व॥ सिद्धत्वादेवचविशेषस्यनानामधेयंविधायिष्यतइतिवक्ष्यते॥ यदाचकेनापिप्रकारेणउक्तिदादीनां विशेषवचनत्वंतदातदप्यनाक्रियार्थंतसामान्यवचनत्वेनयजेरनर्थकत्व॥ आधवचविधेर्गुणविधानविष्यतियागानुवादात्॥ यद्येवंसु

एणक्रियाकर्मत्वात्तद्विधिरुक्तेः ननर्तिकर्मविधीयतेनथावाविहितेकर्मणिकस्मगुणोविधीयतइत्यानर्थक्यं॥ अनच्चारुप्रकृतोज्योतिष्टोमइति॥ नचुरुणविधिपक्षेज्योतिष्टोमेनेत्यस्यापिनार्थवत्वात् अविहितमेवकर्मागत्यनावादिदमेककर्मविधानंनविष्यति॥ तद्यादृष्टेचविधायकेगुणस्यविधानमशक्यत्वात् ज्योतिष्टोमयदमेवैकंनामधेयंस्यादथवातदेवकगुणविशिष्टकर्मविधानमितिरुणिकर्मानुवादेनगुणविधानानि॥ नन्वेवंसतिसूर्याणेकादशीनसत्रचोदनाज्ज्योतिष्टोमस्यैवस्यैवगुणविशिष्टरूपाप्रकरणादितिरिक्ताश्रुतिकर्मतिरुणावान् ज्योतिष्टोमःकस्यचित्प्रकृतिरिनछंदेननामिधानव्याशिक्षांतनिन्यायेरुणादेतिकेचित्॥ दथवाप्रकृयतइतिप्रकृतिः॥ प्रकृतेज्योतिष्टोमइत्यर्थः॥ अथवाअथेषज्योतिरित्येवमादीनांकरणविनाम्नाख्यातमस्यगुणावान् गुणविधित्वानुपपत्तेरेकांतेनैवदंकृत्याकर्मनामत्वं॥ नतुरुदेषेक्षयाचज्योतिष्टोमःप्रकृतिः॥ ननूत्पत्तिवाक्यविहितेनज्योतिष्टोमेनैवावरोधाज्ज्योतिष्टोमगुणांतरविधानमयुक्तं॥ काम्यत्वादुक्तिदाख्योबाधकात्तावद्व्यंतिनिन्यायोगेचपूर्वस्यगुणस्यार्थवत्ता॥ अथवाविनाप्युविहितमपिकर्मशब्दरूपमात्रंनिरुथगुणांतरंविहितंचोत्पत्तिकादिस्मिष्यते॥ तथासतिगत्यसंभवादिकल्पइतिमन्यते॥ अपिवानामधेयेयंस्यादेयद्धत्रावरूपंविधायकत्वात्यदुत्पत्तौ प्रथमज्ञानेऽर्थांतरवाचकत्वेनैकांततानप्रसिद्धमुक्तिदादितद्धैकल्पवहारेप्रथमोपनिपातात्सामानाधिकरण्यात्नामधेयंस्यात्॥ अथवाएवमदृष्टकर्मविदृधदर्थवरुविष्यति॥ अथवाकस्यनामधेयामितिसंदेहेअनिर्णीयतेयस्मात्सेत्रावरूपंनिषद्यतेयोगस्यसमर्थः॥ किंकारणं॥ गुणेविधीयमा

भा० ना० ३ पाद २ अधि ३ सू ३ मानोहिफलेकर्मणिवानवेत्॥ विष्टेतिविधिवुद्ध्यावासर्वथावचनयुज्यते॥ फलंप्रतिनावहिधीयमानेपरपदसंबंधवि
धानंह्यवहितकल्पनाधानेंधात्वर्थस्यैवस्तुतिकसोमबाधःअनदनीयेनचखण्डनिंद्रादिनात्वंत्वाप्रसिद्धेनयाग
श्रुतिदोषः॥तथायागंप्रतिगुणविधौफलपदानर्थक्यं।सार्वकाम्यात्सज्योतिष्टोमविशेषणत्ववाक्यभेदः।प्रत्यय
व्यापारविप्रकृष्टत्वाद्धात्वर्थानदनीययागसोमबाधविकल्पात्प्रत्ययायुक्तः॥ तथाविशिष्टविधौसर्वपदा
र्थेष्वनेकविधिशक्तिकल्पनागौरवंस्यात्सामर्थ्यंतुक्षीणगम्यमानसामानाधिकरण्येनानदनीययागश्रुतिदोषाः
तस्मान्नगुणविधिः॥तदर्थायतिश्रुतेरर्थाकृतिस्तुरुद्रादीनांवक्ष्यतितत्रवक्ष्यते॥वृक्षस्तीष्ठत्यर्थेतिवाय
र्थः॥प्रातिपदिकसामान्यार्थसुक्काविशिष्टक्रियासंबंधोदर्शपूर्णमासदेवतागम्यमानश्रुतिदर्शयतियोगेनेत्यादिना॥ द्वौच
॥विधानेवानुवादेवायागंकरणमिष्यते॥तत्समीपेहितीयांतस्तद्धाचित्तेनमुच्यति॥यदिकारणमिधा
यिष्यतीतृतीययेत्येवमादिषुकारकाणांविशिष्टानामर्थत्वात्फलमात्रकेयंकरणवाविनोदितिप्रतिपदिका
दित्युच्यते॥नैषदोषः॥करणाश्रयवाविभक्तीहीत्यभिप्रायः॥ श्रयवाकरणशब्दोयोदृश्यमर्थंप्रतीतिनादृश्य
त्वप्रतिपदिकंवाचकमेव॥कृदंतेनहिकारकविशिष्टद्रव्यमेवोच्यतेनविप्रकृष्टक्रियाशक्तिः॥तथाच
करणंकरणेनकरणंयेतिचकारकांतरयोगोदृश्यते॥ अन्यथादिविभक्तिहितेनैवकेनकारकेणवत्ती
कारात्तद्द्रव्यकारकांतरयोगंप्रतिपद्येते॥शक्तिकृच्छक्तंतरनास्येवा॥तस्माच्छब्दोपस्थाप्यद्रव्यवचन
त्वात्कृदंतानामुपपन्नंकरणशब्दार्थवाचित्वंप्रातिपदिकस्य॥तेनेतउक्तंभवतिप्रत्ययेनाकांक्षाकर

णंतद्वाचिनःप्रातिपादिकात्तृतीययोपस्थाप्यायागस्यात्रफलभावनायाःकरणंभव्यमितिवक्ष्यति॥ततश्च
यद्यप्येतत्प्रदयागवचनमेवंतृतीयांतंसदेकवाक्यतांयाति॥ अथांतरवचनत्वेत्वंपदंस्मात्॥ ननुवाप्रत्यक्षंश्रु
त्यवचित्त्वमुपपन्नंकथंपुनःकरणत्वानुमानेनवाध्यतेव्रीहिसोमवत्॥ यथैववव्रीहिभिर्यजेतसोमेनयजेत
इत्येवमादीनांकरणंतृतीयायागैकवाक्यत्वेसतितृतीयांतत्वंवैय्यधिकरण्येप्यविरुद्धमेवमिहापीति॥ दृढंप्रतिचि
त्तेनतडागोदकांबादिहरितभव्यसुच्यतेयथानउत्सार्यमाणेप्यविच्छेदतःपुनःपुनर्नूदकंछादयतिएव
मेत्योपिह्यछंदव्यवहारःसहदशतिप्रसिद्धः॥नउच्यते॥पदमज्ञातसंदिग्धंप्रसिद्धेरट्यवहृतिः॥निर्णीयतेनि
र्दृढंनुत्वार्थादयनीयते॥ व्रीत्याद्यर्थायत्नेनैवासेचार्थमपरित्यजतःसामानाधिकरण्येप्रतिपद्यमानागस्त
तरज्ञानवान्गुणविधयोविज्ञायंते॥येपुनरुक्तिदायोयोगिकास्तेषांयेनैवप्रकारेणद्रव्यवचनत्वंतेनैवक
र्मवचनत्वमप्युपपद्यतइतिप्रत्यक्षप्रत्यक्षप्रसिद्धावुदासीनायामनुमानेनाप्यज्ञानेसंशयेवाक्रियासंकरणेन
श्रुत्यति॥सर्वशाष्टार्थावधारणेत्वयमभ्युपायः यत्प्रसिद्धसामानाधिकरण्येनाम॥प्रधानेचकरणत्वयोगेलक्षणा
चान्यकशक्नोतिप्रातिपदिकमात्मविषयमापादयितुं॥ किंच॥ किन्नाम्नार्थानुवादाच्चविधेःस्यान्नाम्निलाघवं॥ गुणपक्षेविधेयत्वसंख्याकारकयोरपि॥ त्वत्तलेत्यवयंपक्षाच्चिद्धिमन्नर्थेपिप्रत्ययस्यविधिशक्तिः
कल्पना॥ तस्मादवयवकरणान्निष्कर्षेपिप्रसिद्धेः ज्योतिष्टोमादेरपिष्टफलोद्देशकारित्वादेतन्नामप्रसंग
श्रुतिवेत्॥ नसामानाधिकरण्यावधारितविषयविशेषस्यावयवार्थान्नारब्धानान्नचास्यज्योतिष्टोमादिनिः

ततश्चक्रुवतश्चेत्तावन्मात्रविवक्षितमित्याज्यादिग्रहोच्यतो निर्णीयते॥ पवमानग्रहस्तुयोगिकत्वाद्वा धिकरणसिद्धेरनुवादरूपमिति केचित्॥ अपरेत्वमन्यंते॥ नोक्थादिवत्तावत्कियाप्रतिकर्तृत्वंस्तोत्रस्योपपद्यते॥ सोमोहितत्पवते॥ अतश्चैतत्कर्मरूपवयवप्रसिद्धिरस्तीति पवमानार्थमंत्रकत्वान्नक्षित्र लक्षणमन्त्वर्थलक्षणतोऽर्वञ्चतरेतिवासन्नेदनेवसिद्धेरनुवादोहरणं॥ तत्रप्रसिद्धादर्वः पूर्वपक्षोऽर्व वदेवव्याख्यायाः॥ चित्रेफल्गुनरूपक्षेद्योनुनादश्रीवोमीयेगुणविधिशिष्टः॥ अत्रकारणमुच्यते॥ चित्रत्वस्त्री स्त्रीत्वयोगेहिप्राणिजातोस्वभावतः प्रसक्तेप्राणियागांगंप्रकृतिदेवताश्रिते॥ स्त्रीत्वादिविभागेहिप्राणिद्यति रिक्तेर्थेप्राप्तानुकारमात्रेणविज्ञायते॥ पञ्चस्थितत्रार्थेहुपेणप्रकृतेचदध्यादिद्रव्याकृत्वान्नेतद्योग्यंकर्म स्फुरूप्यमाणेवावाद्यागमात्रसंबंधिनीप्रसक्तेसामर्थ्यात्प्राणियागमात्रकांक्षतीप्रकृतोवाहिनुकृत्वादि निमित्तायेनसर्वप्राणियागपरमप्रकृतिमग्नीषोमीयंगछतः॥ तत्रयद्यप्यनुवृत्तिवाक्यमिष्टकासारंगलो हितसारंगादिगुणंतुरपुंस्त्वंचबाधकंसंतावप्यतेनतथापिश्रुर्ववदेवबाधविकल्पोवक्तव्यो॥ सामस्त्वपूर्व पक्षन्यायमश्रुत्यश्चात्रदृष्टाः॥ एकपदीपात्रानेकार्थविधानादेककारकनिबंधनत्वादवासन्नेदोनिमायः ॥पशुकामग्रहोपिचन्नार्थकाधिकरणपूर्वपक्षन्यायेनाजंनागत्वादनुवादोनिमनः नथागफल्गु गंहिपशुयागःपशुमकामयमानेनानुष्ठातुंशक्यते॥ यागनुवादोविज्ञातत्वादिति॥ सर्वत्रासौतसं बंधेहुश्रूयमाणेपदोनरेविधिरात्मुपसंक्रांतेः स्याद्धानोरनुवादना॥ वाद्यावहिद्विधेयोनरसुपादी

यावद्याव

नाद

उ

यतेनर्वत्सर्वत्रानेकशक्तिकल्पनागौरवादर्वाक्कालवति॥ अगत्यातुनत्रापिविध्यंगीकरणंअस्तिचात्रचि त्रित्वेनागश्रीषोमीययागश्रुत्यनूद्यते॥ गुणेफलकल्पनामांदंबादर्वाक्कावर्जनेरविवक्षेतिकिमर्थंरुणवि धिरत्रवसन्निरुक्रियते॥ सिद्धेतग्रंथेप्रमाद्दत्रस्खलितइतिकेचित्॥ अपरेत्वाहुः॥ फलेसंबंधेकिम प्रधानत्वाद्गुणेक्रियायाःस्यादितिभेदसूक्तं। सर्वयागानामेयप्रतिपक्षोगुणविधिः॥ सचफलसंबं धेप्यनपगतः॥ तथाचवक्ष्यतिस्मिंतएतस्मिन्नधिकरणेगुणविधिर्नभिधेयमितिविचारयति॥ फलसं बंधेह्येकांतेनयागेसामानाधिकरण्यानावाद्गुणविधिरेवस्यादिति॥ नैनैववाच्यं॥ इहत्रयःपक्षोःप्रतिभाति गुणेविधिःफलेयागेवानामध्येयंवेत्येकेकस्यचदयंदर्यनिराकर्तव्यं॥ तत्रद्रव्यपक्षस्यएवऽर्थक्षतत्वा त्तृतीयंपक्षंविराकरोतिधानुमारार्थेप्रसंगात्रुश्रुत्यश्रुत्रीहिभिर्यजेतेतिवद्यागेगुणविधानं॥ करणत्व तस्माच्चयागस्योत्पत्तिवाक्यावगतकरणत्वार्थंकृतसाधनानुवादेनगुणेविधीयमानेन॥ मतर्थलक्षणा॥ गुणवाद्येकवचनमिनवसमर्थयागेगुणविधानमाश्रयति॥ फलेगुणविधिकल्प नायांतूर्वाधिकरेणोक्तदोषप्रसंगादिति॥ तथापंचदशीस्तोमानीत्यत्रविभक्तिवंतीपरश्रुतिस्तोमकर्मत्व नं॥ प्रयोगवचनाच्चविधिः॥ ननुवैपदेत्तनिसप्तदशेनोतिचैवमेप॥॥ त्रयोनेऽस्तोमात्रवार्वा॥ स्तोमेः संख्या उविधिःपंचदशाद्यर्थश्रुत्यरणात्॥ तहिस्तोमश्रुतिस्तोत्रीयासंख्यातोन्यात्रिधीयते॥ नैषदोषः॥ स्तोत्रसाधनमात्रपरिछेदेस्तुस्तुतियोनात्मकस्तोमसिद्धेः सदृशमृक्परिछेदेदृष्टेपरिछेदेचस्तुतिमान

रिछेदेन

वाचित्वो॥ नचात्रमत्वर्थलक्षणं॥ कुतः॥ श्रूयमाणस्यवाक्यस्यूनाधिकविकल्पने॥ लक्षणावाक्यनेदंदोषो
नानुमितेत्वसौ॥ इहतावदाज्यादीनांश्रुतवाक्यसंयोगाभावादवश्यप्रकरणात्तानुमितवाक्यसंबंधपूर्वकःप्र
योगवचनविधिराश्रयितव्यः॥ तेनचमत्वर्थएवप्रतिपाद्यतइतिनलक्षणा॥ तत्रैतत्स्यात्॥ मत्वर्थाद्याज्यादी
नांकर्तव्यताविशेषात्मकेतिकर्तव्यताधिकाप्रकरणेनावहंगमिति॥ सर्वैर्वात्रक्रियेत्यनुषंगेनः॥ प्रधानदे
शत्वाद्दंगनामाज्यादिभिरवश्यंस्तोत्रसमीपेनयितव्यं॥ अनश्चयष्टेवायिसुपनिधायकर्तव्यत्वाच्चाग्नि॰ सन्नाया
त्रेणोपकरोत्येवचमिदापीतिनिदोषं॥ तस्माद्गुणविधानमितिप्राप्तमभिधीयतेप्रधानेनेतिसंबंधइति॥ अने
कार्थविधानहिप्रधानकर्मविधानेसत्युपपद्यतेअत्रपुनःकर्मानुवादेनगुणोविधीयतेनचगुणानांपरस्प
रंसंबंधोविद्यतेनत्रैकंगुणंतरावाक्षेपात्पर्यापत्तिभावेश्रौतानेकविधिव्यापारकल्पनायांपुनःपुनरुच्चा
रणंप्रत्यस्मकर्तव्यमितिवाक्यभेदःस्यात्॥ आहच॥ अर्थादनेकमप्यर्थंविधापयतिनावनाविशेषणवि
धित्वम्पन्नपृच्छतिविशेषणं॥ एकपदोपात्तेपिचानेकविधिशक्तिकल्पनातगौरवमस्त्येव॥ उत्पत्तिवाक्य
श्लिष्टगुणांतरविरोधाच्चाशक्तिः॥ तथाहिउत्पत्तिवाक्यविज्ञातंकर्मसंबंध्यनुद्यते॥ नचाश्रितगुणोवाक्यांतर
रोधिगुणांतरं॥ यत्रानुद्यमानएवावश्यंगुणोप्यनुवेदितव्यः॥ तत्रनैरपेक्ष्यदर्शनादाकांक्षाधीनसंबंधगु
णांतरविधानानुपपत्तिः॥ नचनिकृष्टक्रियायामत्रगुणविधिः कः॥ कुतः॥ प्रथमंहिस्ववाक्यस्थैर्गुणैःसंब
ध्यतेक्रिया॥ वाक्यांतरगतैः पश्चात्संसृष्टायाह्यवाप्यते॥ यानिपरस्परंनिरपेक्षाणित्रीह्रियवादिवाक्यवदेव

प्रकल्पंतेतेषांतुल्यबलत्वात्रूवतिविकल्पः॥ इहचोत्पत्तिवाक्यमन्यनिरपेक्षंविदध्यात्नोत्पन्नवाक्यमनुत्पन्नेनुवादानुपप
त्तेः॥ चसुकामसंबंधात्पदांतरगतपदार्थग्रहणंनिमित्तोपिवाक्यभेदोविद्यते॥ यद्यपिचफलेनविधीयतेतथाप्य
प्तिजन्यकर्मविधानात्कर्मणिचगुणविधेरस्त्येवगौरवं॥ अपिचकर्मणःफलंगुणोप्रतिसुगयद्विध्यनुवाददोषोपरः
स्यात्॥ नचपसुकामपदमजहल्लक्षणात्प्राप्तमनूद्यते॥ कथं॥ पुरुषार्थोहिसर्वेणास्वरसादवकाम्यते॥ तत्साध
नतंहिगेषुप्रवृत्तिः प्रार्थनादृते॥ नहिसाधनभूतंपसुकश्चित्कामयतेविनैवतुकामेनप्रार्थितात्मथानुपपत्ता
नुपपादन्नेगोर्णीवात्मकाम्यतांलभेत्॥ अतः स्वातंत्र्येणायन्मुख्यतयाहृत्पाकाम्यतेनदेकामराष्ट्रोपबंधात्क
लंप्रतीमः विस्तरेणचैतदसाधकंतन्नादर्थादित्यत्रवक्ष्यामः॥ फलंचाग्नीषोमीयस्यकर्तृत्वाच्चैतदस्यद्वारा
स्यानुज्ञातासंभवः॥ प्रकरणंचबाध्येतप्राजापत्ययागस्य॥ नामधेयत्वोत्तुकर्मफलसंबंधोमात्रकरणंचक
श्चिद्दोषः॥ पंचदशाग्नाज्याज्यौतिष्टोमसंस्थयोस्तोत्रेष्टप्राप्तत्वाच्चान्यतरानुवादेनेतरविधानसंभवः॥ क
र्मांतरस्थंचनप्रतीयतेति॥ नह्यनुवादेनचगुणविधावकर्मांगत्वप्रसंगः॥ प्रकरणंबाधश्चभवतिनचविश्लिष्टस्य
विधिष्वुपपद्यतेश्रुतिवत्कल्पनेनत्रैकत्वमयज्ञांगभूतमिति॥ नचक्रियाविशेषणंविधीयते॥ विधायकस्यनामांप
देः साक्षादसंबंधात्॥ नचेहक्रियोपात्तयाविधीयमानार्थादनेकमक्रियागुणमाक्षिपेत्॥ नचैषांस्तुतिप्रयोगव
चनेनयद्गुणमक्रियात्मकत्वात्॥ आहच॥ नावांतरक्रियायोगादृतेवाक्योपकल्पितान्॥ गुणान्नैकक्रियां
वैगल्पंतिप्रकृताःक्रियाः॥ नचभवतिक्रियाप्रसंगत्वात्नोपपद्यते॥ सद्वोद्रव्यात्मकोन्यत्रक्रियते॥ सत्ता

मा॰ना॰ यास्कवत्स्वात्मनाप्रमाणापवर्गीत्वासाध्यत्वं॥ नच्यतिरिक्तसाध्यांतरानुपेक्षत्वाच्चोपकारसंबंधान्नैकर्त्यनात्वं॥ यु
७ ह्युरथंनरंप्रवर्तीसंवंचोदितानामपिप्रकरणग्रहणंनदर्शितंदेवतासामर्थ्यांतरक्रियासंबंधज्ञानात्॥ नचाज्यादीनांलोके
येन्न सत्रानांसिद्धार्थेनेहानींप्रावेन॥ स्तुतिप्रयोगसंन्निधिस्थायनप्रावनाकरिष्यतइतिचेत्॥ नचोदितत्वात्॥ च
अग्निमुपनिधायेतिनुत्पन्नविधानं॥ आत्मलाभव्यतिरिक्ताचेयंक्रियावाक्यतेकथंप्रावेनयुक्तीनं॥ सिद्धांतेन
चवाक्यस्यार्थवत्त्वान्नार्थक्यानुपपत्तिविनियोजकवाक्यकल्पना॥ यदित्वाग्नेयःस्तुवतइत्यनेनविहितानांपं
चदशविधितुच्येनतत्तः पूर्वाधिकरणन्यायेनसेवमर्थैलक्षणेतिमत्वावदत्यपिवाज्यानिस्त्रीत्वाणीत्यादि॥
संसर्गिशब्दत्वाच्चाज्यानांसाङ्गासंचदशत्वयोगान्नावदङ्गतपूर्वादिपरिमाणकल्पनावश्यंश्रयितव्या
नवेन॥ तेनैवविरुद्धायते॥ यद्यप्युत्पत्तेर्नामत्वंनस्यानंगुणवाक्यंचनस्यानधिकारः तथाप्येतद्गुणविधान
मेवंसिध्यतिपक्वत्पन्नावाज्यशब्दानामधेयनान्यथेति॥ गुणवाक्योपस्यार्थसंनिध्यादनेनच॥ अन्वाख्यानार्थवादाच्चनामधेयत्वमाश्रित॥ यद्यसौयुत्पन्नदाज्यानामाज्यत्वमितियस्माद्देवाः प्रजापतिवचनादितेपुत्रो
त्रेधाजिमधावंस्तन्नस्यदर्शयित्वादेताछाज्यानीति॥ नथाताभावायुः पृष्ठैरवर्त्तनेति॥ यस्मादपांवायुनाशृतंसृ
ष्टंरथंतरादीनिजातानितस्मान्नानिष्टानिस्त्यर्थवादाद्विज्ञानं॥ तत्प्रकृतित्वाच्चवामदेव्यादिषुदृष्टशब्दप्र
सिद्धिः॥ शवेनावाश्यावेकस्यवाक्यस्यैवित्यस्मान्नंतरमथकस्माच्चपंचदशसंख्याविशिष्टानीत्येवमादिदृष्ट
व्यं॥ विशिष्टानांवाचकस्यान्नावादितिप्रधानाख्यातानुच्चारणानिप्रायं॥ नसुपदद्वयमितिन्नैवंक्रियासंब

अशक्यो

धात्प्रत्ययं॥ नतत्पदद्वयमपिविधायकमिति॥ प्रधानक्रियाविशेषणनिष्ठिंडीकरणेतिसन्नायास्तुप्रत्येकवर्तित्वाच्चस
मुदायेवाक्यपरिसमाप्तिः॥ अतश्चपरस्परसंबंधाभावः पंचदशानिकानिचिरुवंतिच्याज्यानुपियावंतिताव॑न्ति
तिकल्पना॥ तस्मान्नानयोर्विधायकंनछंनुवादकस्तोत्रेपुनादृश्यस्मान्नावादानर्थक्यंसंगच्च॥ तस्मादेका
नुवादनेतरविधिर्नामधेयत्वेवकल्पते॥ विधायकमितिचात्रविधेयार्थोपनयनव्यापारात्पुनः पुनरभिहि
तं॥ पुनरभिहितं॥ ननुनामपदस्यविधिशक्तिरस्तिपंचदशानीतिचस्तुतिसाधकंभवत्स्तोत्रीयापरिछे
दान्मुख्यस्तुतिमानभिमन्यस्तोमत्वमितिश्रेष्ठसाम्नजस्यंति॥ तत्प्रस्तोवाप्यङ्गत्वं॥ ननुसर्वत्रहिप्रका
रमेववानामपदंसाविज्ञायिकंयौगिकंच॥ उभयमपिवाधिकरणद्वयेनप्रतिपादितंकियदानीमवशिष्यते
येनपुनर्विचार्यते॥ उच्यते॥ यौगिकानामेवमत्वर्थलक्षणापरिहारेणात्रविनोद्भत्रराधिकरणेनसांवि
ज्ञायिकानांवाक्यनेदासंभावात्॥ तत्रान्नयेहोत्रमुस्मिन्निति सिद्धांतेयत्कर्मणमादम्यसमासानुपलब्धेश्च॥ तेणि
तमत्वंथविरुद्धंहिरस्तुतेनगुणंविधत्ते॥ तोणवंचसिध्यादहोहेतवः॥ सत्यामपिचसायंहोमेग्निप्रासोनहर्ज्य॥
नहोमिमात्रानुवादाद्दोसवदविहोमेग्निविहितदेवताकेनुविधास्यतिवाक्यसामर्थ्यात्॥ तथाद्वारइतिद्वारेण
समर्थनंवाज्यशब्दापयः प्रभृतिश्चधीयते॥ नचाद्विनीयातिदर्शनात्क्रियासंस्कार्यत्वेनाध्यवसीयमान
मनुपयुज्यमानसंस्कारानुपपत्तेः प्रयोजनमपेक्षते॥ धर्ममात्रंचतस्यद्वारंगंगाशब्दार्थमात्रापवर्गित्वाच्चा
शेषद्वारंगंकरोतीति॥ ननुद्वारिनैकदेशेनकिंकर्त्तव्यमित्यस्यापेक्षा॥ लोकेपिचद्वारंद्वाराणांकचि

लो

नाम॰ त्यादावुपयोक्ष्यमाणं नामीषदूक्षारणं संस्कारं कुर्वंति॥ तेनाग्निषवयुक्तदृतीकवत्प्रक्षणायुक्तफलचमस
वत् संस्कार्यमेवं कर्ममात्रमिलादि॥ प्रकरणवशेनदर्शपूर्णमासप्रधानात्कपमर्पति॥ तत्रापिचाग्नेयादौ
नाधिहितमेव्यकत्वाद्धविष्यसुयाजः केवलःसाकांक्षश्तिहादर्थंप्रतिपद्यते॥ आहच॥ ऋतसंस्कारसंबंधसुयो रथे
र्थद्वयसंगत॥ अन्यथातदयोग्यत्वात्प्रकृत्यात्प्रकृतेःप्रकृतेर्यातिसंगतिं॥ अथवायत्करोतिप्रत्याथार्थ ती॰
मात्रंसाकांक्षत्वाद्देवोपांसुयाजनावनायचूधाद्यारभ्यवाक्येनविधीयमानेनत्साध्यवादेवधात्वर्थः प्राप्तो
नूद्यते॥ औत्पात्तिकेवातस्यक्षरणस्यकृत्वेविज्ञातेक्षरणसमर्थमात्रपयः प्रधतिविधिंमन्यते॥ नचर्क्षा धा
त्वर्थादेवसिद्धेर्नात्रप्रयोजनंनचसंस्कारेकर्मणिक्वचिन्नामकंचनावंतिदृश्यंतेऋत्येवसंस्कार्यत्वादवश्यंक्वचिदस्यगुणत्वमित्यभिप्रायः॥ अत्रोच्यते॥ विधित्सितगुणप्राप्ति
प्रणार्थस्यद्यतसिद्ध॥ तस्मात्तत्रापूर्णत्वर्थमितिनामत्वमिष्यतेतो॥ अत्रवदामः क्षार्यहोमेयदिदृष्टयादाधारे श्रु
चपदोविधिंनतः क्षणत्वात्तारेप्रासोविधिः स्यान्निःप्रयोजनः॥ यक्षच्चदेवतेहोमेदेवनाविधिरुच्यते॥ रुव्य रामः॰
चोपांसुयाजस्तुदानत्यरभ्यतांकुथ॥ उच्यतेविधिश्चेदग्निहोत्रंस्यान्नतोस्यविषयेविणः॥ निवेशःप्रकृतेवा
स्यायुक्तरप्रकृतेपिवा॥ अग्नेहोत्रेणसंबंधेकृतेत्यनप्रवर्तनात्॥ अग्निहोत्रपदेस्पष्टमनुवादत्वलक्षणं॥
अनूद्यवापिधात्वर्थंगुणःसंविधीयते॥ नचानुवादःप्रकृतात्कर्मणोन्यत्रतस्यते॥ प्रकृतंचेदनूद्याय
गुणंहोमेविधीयतेनत्रतत्प्रसक्तान्यत्रनाविधिस्तत्परिग्रहात्॥ नचधात्वनुवादोत्रकथंचिदुपपद्यते

प्रकृताप्रकृतान्नावात्रस्यात्कर्मविधीयते॥ सायमृद्ध्यादिसंयुक्तेगुणेवाकेविधीयतेसुहुनश्रुयतेकर्मप्रकृतंना तेतेन
स्या॰ तत्॥ दूरस्थानुवादश्चव्यवधानाच्चयुज्यते॥ तस्यबुद्धावनारोहात्कोंडपापिनहोमवत्॥ विधीवतांविधि
स्मं॰ ष्टंचेत्कर्मैवंविकल्प्यते॥ नचेदन्येनसिद्धास्युस्तत्रैवेतिचोत्तरं॥ नचतुर्थीसमासस्यलक्षणंचात्रविद्य
ते॥ नचैतेनविनाशब्दादेवतांविधिकल्पना॥ यःकश्चिदेवसंबंधषष्ठीतत्पुरुषाश्रयेत्॥ अनुवादेमतः सि
द्धेकथ्येतापिचघासवत्॥ विधानंचश्चसंबंधोन्नवेत्सरपदार्थयोः॥ प्रातर्होमेपिहेनैवद्विर्नैवंविधीयते॥ ए व॰
कदेशेपिचज्ञानान्नानुवादोपगछति॥ आधारःस्यापिसंबंधःकेशेनांसुकर्मणः॥ सामानाधिक
रण्यंचसाध्यांशेनैहकर्मणः॥ विस्पष्टंद्रव्यनामत्वंविनोद्यामस्यते॥ नोभपदेशंच॥ अथेषन्नोतिरित्यादि
वर्जमुदाहरणं॥ तेषांहृतीयानिर्देशंगुणानुवादगुणविधित्वतंतिपिचवाक्यांतरेषुयदाहृतीयानिर्देशंप्रति
पद्यतेनदाविचार्यते॥ अथवाप्रथमानिर्देशेनद्रव्यमपिप्रकृतंपश्चात्तत्साध्यक्रियोपन्यासःसंनव
नीयेतेप्युदाहरणमेव॥ तत्रतैरेवप्रसिद्धादिभिर्गुणविधिः॥ नचात्रकर्मणिप्रवृत्तिनिमित्तंकिंचिद
स्ति॥ वत्सेर्थोपादानेनकर्मणिप्रवृत्तावविप्रकृष्टागौणतास्यात्॥ तत्रवश्यत्वर्थंनक्षण॥ साधनंहि
प्रतिपन्नंतावान्नयसाध्यांक्रियमलक्ष्येनैवभवति॥ विधिपादयतिविनैवमदृष्टोपन॥ किंच॥ मत्व
र्थोवापवेलायामेकांबाक्यवशान्नभवेत्॥ इवार्थःपदवेलायांगृह्यमाणोतिदुर्बलः॥ गुणविधिपक्षेहि
स्वार्थापरित्यागेनैवरूपेनपदंतद्धेनेसुत्तरकालेनलक्षयति॥ अन्योच्चरणकालेनुत्वार्थमेवविनियुङ्क्ते

नेनवतस्कृत्वेनार्थानुपयोगादितिएवमादिरूपविज्ञायापदमत्रमित्यस्यफलगानत्वनिवाधप्रसंगः॥ नच्यतेवि
धेयंहूयतेवस्तुनिष्ठमोपमयासदानहिनेनैवतुल्येवस्तुनिस्तद्वदितीष्यते॥ रूपेनादिवाक्येषुहियथावैरूपेना
निपत्यादत्तेएवमयमयंसुषमानुस्तुतिरूपते॥ नथाचविधीयमार्थस्यान्यविनव्यं॥ गुणविधानेचरूपेनद्रव्यं
विधीयतइतिनदेवस्तोतव्यं॥ नचनत्सेवात्मनेवोपमानंयुक्तं॥ अथोच्येतानन्यत्वेनस्तुतासंस्कृतिर्नवत्य
नन्यसंज्ञनविचरितत्वात्॥ यथारामरावणयोर्युद्धंरामरावणयोरिवेतिनवतिलोकाल्पनिकमवस्थादिग
तंनेदमाश्रित्येवमपिस्कृतिः॥ संज्ञवतितुनदेनयुक्ता॥ नामधेयत्वेतुयागस्यैवः नस्यद्रव्यरूपेनोपपत्तेरा
नस्यं॥ इतरथाहिदोमात्यर्थवात्स्यार्थलक्षयितवोलोकाल्पनिकश्चनेदइतिगोरवं॥ नवयागस्तुयानदा
श्रित्यानदाश्रितनद्रव्यस्तवनमवकल्पते॥ यागविधेरनिराकृतत्वात्॥ अविधेर्यागनादिसतिरर्थवसं
चार्यतोयागस्तुचर्यमेवविधिस्तुतिर्नागत्रोनितव्यंहूयतेविधीयतेवा॥ पुनरपिचयागेनद्रव्यज
क्षणादिप्रकृष्टना॥ सम्यनिद्याद्वारात्तुद्रव्यवद्देवयागवच्चनत्वंमुख्यं॥ विधौचनवलक्षणमनुवादेनु
णवच्चनोपस्तुतुवादे॥ गुणवचनेषुश्चमतुल्लुप्तायतेनद्रव्यंचनेत्यः॥ श्वार्थसुपूरणशष्टस्यपरत्र
प्रयोगात्स्वयमेवोपजायते॥ मत्वर्थलक्षणत्वद्यंकल्पनीया॥ क्तसक्तवत्वयोः यष्ठीवैरूपेनइत्यादि
ना॥ एवंक्रियाश्चद्यातुपारार्थ्यप्रत्ययविपक्षदोषावक्ष्या॥ नामधेयेगुणश्रुतेः स्यादिधानमितिचेत्
॥ नत्रसंबंधेनाख्यातपदस्यैधान्वर्थः फलंप्रतिकरणंगुणंचप्रतिसाध्योनवचनित्यसंते॥ तेनोद्दिश्यायो

गंयागेनचपसुंनावयेदितियुगपद्विधिव्यापारादिनैवमत्वर्थलक्षणवासंधसिद्धिः॥ तथाज्यादिपदस्यनत्रेणसोत्रसं
स्कारादियोगः॥ तस्मात्सर्वत्रत्वत्परिकल्पितेनामधेयेगुणः श्रुतेः प्रसिद्धादिनिर्गुणेप्रत्ययानपगमात्रद्धियागस्
नवतुश्रुतंनामधेयेनेतिपथासंनवंसूर्योधिकरणेक्षेपेषारम्भने॥ नचेदमपिवाक्यंसुष्ठुनविप्रतीतिवाजपेयो
पन्यासःसर्वाण्येवत्तिहोदाहर्तव्यानि॥ चोदत्व॥ करणेष्टपादिष्टेषुवा॥ तोत्याध्यत्वकल्पना॥ तस्मागुणविधा
नेनतात्त्विमत्वर्थलक्षणा॥ तुष्टत्वात्॥ क्रियायोर्न॥ वाजपेयेतावदयंविशेषोनिधीयते॥ वाजंपेयंयवागूः स्मा
देषधश्रुतातनः॥ श्रुयमाणप्रसामान्यादैष्टिकत्वंप्रसज्यते॥ एकशब्दोपरार्थवत्॥ तत्रत्वमेकद्वेष्पेण
नवेतुल्योपकारत्वः उपकारान्यमात्वेतुनवत्यावृत्तिलक्षणं॥ द्वेधाहितंत्रनवतिप्रत्येकंवाससुदायेवावाक्य
परिसमाप्तौ॥ आस्मातगुणत्वप्राधान्योपेक्षया॥ नहिद्रव्यंतावद्यागेविधीयतेनफलत्वप्रसंगात्॥
उद्दिश्यमानंहिसर्वत्रफलंनवति॥ नचेक्रियांप्रत्युपकरोतियेनश्रुतमेवस्यात्॥ यागोपिफलप्रत्युपादानेनश्रु
तेनद्रव्यंप्रति॥ संस्कारत्वप्रसंगात्॥ तृतीयानिर्देशाबाधाच्च॥ नचयागसंस्कृतस्यद्रव्यस्याज्यवोपयोगेवि
ध्यतेयेनैवमाश्रीयेतनत्॥ एतेनयागफलयोर्द्रव्यंप्रत्युपादानप्रत्युक्तं॥ नचफलेयागद्रव्ययोस्तुपादानमेके
ननिराकांक्षेफलेन्यस्याविधानात्॥ यथावक्ष्यति॥ यदेकस्माद्दर्वतदेतरन्नार्थीयेति॥ नवद्रव्योपसर्जनो
यागः फलेविधीयतेमत्वर्थलक्षणादिप्रसंगात्॥ नत्रैतदेवापतितियागेनफलंयागंचद्रव्येनेति॥ नत
श्चफलेनोपादेयविधेर्यगुणभूतयागग्रहणंतद्गुणेनवोदेश्यानद्यप्रधानतापेक्षणंतत्त्वात्

भा॰ १०

वः॥ एकमार्गाश्रयणेऽन्यतरस्यासंबंधात्॥ तत्र युगपदाश्रयणे वाक्यभेदात्॥ अवश्यं हि यत्रोद्दिश्यमानादि
रूपं यत्र वोपादीयमानाद्यात्मकता तत्र यागस्यैते द्वे वाक्ये कल्पनीये न तु द्वे एवैते इति॥ तंत्रपदमभितो दर्शयन्
ब्रवीति॥ चत्वारि पदान्यूपत्वेनेमहीति अलुप्तार्थत्वादतंत्रत्वाभिप्रायेण॥ परस्य तु शब्दरूपाभेदात्साधारण्या
भिमानः नैतदस्तीति कार्यप्राधान्याच्छब्दरूपस्य तत्र तत्र वैरूप्याद्भेदापत्तिः॥ आह यदिदमुक्तमिति वैरूप्यं परि
हरति॥ गुणविध्यंशेपि ह्यवश्यमाख्यातं विधिरूपमेवाभ्युपगंतव्यं वाजपेयपदस्यानाख्यातत्वेनाविधायक
त्वात्॥ पद्युभयत्र विधिरिति द्रव्यसंस्कार्यत्वप्रसंगमनादृत्याख्यातं गुणभावकृतप्रत्येकवाक्यपरिसमाप्तिनि
मित्तपरस्परासंबंधोपन्यासः॥ प्रकरणावरोधात्व्रीहिभिर्यजेतेत्यादिवद्व्यवस्थेति चेत्॥ न वाक्येन यागमात्रे वि
धानादिति तंत्रसंबंधे हि परस्परनिरपेक्षयोर्यागेन संबंधः॥ एकविशेषितेतरसंबंधे वाक्यभेदप्रसंगात्॥ तत्रा
निष्पन्नेस्वाराज्ययागप्रकरणे गुणो विधीयमानः शुद्धं यजति संबंधात्सार्वत्रिको पूर्वयागसंबंधो वा विज्ञा
येत दर्शपूर्णमासादिवाक्यैस्तु निष्पादिते प्रकरणे विधीयमाना व्रीहीन्यवतिष्ठंते इति वैषम्यं॥ तेन स्वारा
ज्यकामयागैकवाक्यतागम्यमानानोत्सृष्टा भविष्यतीति नामधेयता॥ तद्गुणास्तु विधीयेरन्नविभानाद्विधाना
र्थेन वेदन्येन शिष्टाः॥ एवं सिद्धेषु नामधेयेषु नामधेयकार्येषु वदानीमपवादः॥ प्रसूयते॥ कस्मात्पुनरिहै
वदर्विहोमपदं न विचार्यते॥ विचारितमतमेतदपि॥ तत्प्रख्यमित्यनेन॥ विध्युद्देशगतानां वेदविचारात्तत्र त्व
र्थवादगतानां यदेकया जुहुयाद्दर्विहोमं कुर्यादिति सिद्धे वा कर्मनामधेयत्वे तद्विशेषविचारस्तत्र इह पुन

सामान्यविंतेति नोपन्यस्तं॥ यात्तु तत्र गुणविध्याशंकाधिकरणमध्ये परिचोदनामात्रं॥ सर्वमेवैतत्प्रासंगिकमष्ट
मे पूर्ववदपूर्वचिंताधिकारात्॥ केन पुनर्विहितानां कर्मणामाग्नेयादीनां नामधेयत्वमाशंक्यते॥ तदुच्यते॥
अष्टाकपाले॥ भवतीत्यादिभिर्द्रव्यमात्रयुक्तक्रमवत्यो भावनाः प्रतिपद्यते॥ तासां च स्थानक्रमेणाग्न्यादि
देवत्यानि याज्यानुवाक्यायुगलान्याम्नायंते॥ तानि क्रमविनियुक्तानि संति मांत्रवर्णिकीः कर्मांगभूता देव
ताः कल्पयंति॥ न ह्यन्यथा ते मंत्राः कर्मोपयोगं गच्छेयुः क्रियास्वरूपप्रकाशनेन तत्संबंधिप्रकाशनेन वा मं
त्राः कर्मोपयोगितां गच्छंति॥ न चैतैः क्रियाद्रव्यं वाभिधीयते॥ यदग्न्याद्यभिधीयते तस्य संबंधित्वं न ज्ञातं
तत्रासंबंध्यग्न्यादिप्रकाशमेनंगत्वप्रसंगः॥ तेनावधारितांगत्वमंत्रानुरोधेनैवं विज्ञायते तेनैवं दंति जवदंति
तेनूनमग्न्यादयः क्रियांगमिति ते च मंत्रेषु प्राधान्याभिधानाद्देवतात्वेन प्रज्ञाता इति तदवैलक्षण्यात्कर्मस्व
पि देवता भवंति॥ पुरोडाशादिभिरपि च हविरात्मकत्वात्योग्यतया यागसाधनत्वेनोपलभ्यमाने द्वैतेवा
कांक्षितेति द्रव्यदेवतासंबंधनिष्पत्तेरनुमितानां यागानां तत्प्रख्यं चान्यशास्त्रमित्याग्नेयादीनां नाम
धेयत्वं॥ अथवाष्टाकपालादीनां हविषोवद्यतीति ह्यवदाने गृहीते वोदानांतरेण च तत्संस्काराद्योपस्तरणा
भिघारणाग्रहणाच्चतुरवत्तो निष्पन्ने चतुर्होतीति वचनाद्यावद्द्रव्यं निष्पन्नानां होमानां तथैवाग्न्यादिषु
प्राप्तेषु नामधेयत्वं॥ एवं चानेकार्थविधिदोषो न भविष्यतीति॥ तथा प्राप्तेभिधीयते॥ न वेदन्येन शिष्टा
स्युर्यागाः शब्देन केनचित्॥ ते गुणाश्चोपदिश्येरन्विधिना ह्यविभागतः॥ न तावदत्र द्रव्यदेवतासंस्का

रसंयोगेनयागविधिरुपपद्यते॥ कथं॥ नह्यस्यस्वरूपेणमंत्राकांक्षावकल्पते॥ नचान्यवाचिनानसंबंधः संप्रतियते॥ नाशक्तपाजोनवतीत्येनावनाकश्चित्तुपवषापारेधीयतेयोनुष्ठानायस्मृतिकारणंमंत्रमपेक्षते॥ नपुरोडाशानवनंपुरुषस्यानुष्ठेयं॥ प्रतिनियतकर्तृकत्वक्रियाणां॥ नापिमंत्रस्वरूपेणसिद्धात्मकत्वात्कर्तव्यंयेनस्मार्येत॥ नचाविमृष्टादिनिर्मंत्रतयापरेवाप्रधीतेयेनाकांक्षयापिसंबंधेरन्॥ अस्याद्यप्रधियिनांचनकश्चिन्नेः संबंधोविद्यते॥ नवयागोहविष्टवापुरोडाशेवधारितं॥ येनस्मादेवनाकांक्षानमंत्राणांचसंगतिः॥ यदिहिप्रथमयागत्वमवधार्येतनोदेवनाकांक्षायांसत्यांदेवनावाचिनोमंत्राःसंबंधेरन्ननुरुवनिशाष्टेनोक्तं॥ नचयागसंबंधात्प्राक् पुरोडाशादीनांहविष्टमवधार्यते॥ संबंधेशष्टाद्यर्थंद्रव्यस्वरूपप्रयुक्तं॥ नह्येवहिद्रव्यमयागसंबंधंपश्यः प्रकृतिनलोकेहविः शिष्टवाद्यनवति॥ एतेनचतुर्वत्रचोदनाकल्पितकर्मनामत्वंप्रत्युक्तं॥ आधारादिषुतुक्रियात्मकत्वात्मंत्राकांक्षायांवचनंविनियोगवशात्स्यनवतिमंत्रवाणिकदेवताकल्पना॥ सर्वजघन्यश्चायंदेवताविधिः सर्वज्येष्टेनहिनदेवताविधौसंभवतिकिमित्याश्रीयते॥ घ्रन्यमानुपपत्तिमूलआसीनचतद्विनेसंभवतिन्यायानुपपत्तिः॥ तस्मादनेनैवक्रतुद्रव्यदेवतासंबंधेऽर्थवादपूरः सरेणभवतिशाष्टेनविहितेविशेषायंत्रमेरणमंत्रात्मानंस्मृत्वाचानेकार्यविधिरंगीक्रियते॥ विधानार्थेतद्विनानेशाष्टस्मृतिविधिप्रयोजनत्वात्तिप्रायेण॥ सर्वंचैतेस्यादविनाकंगम्यते॥ देवनातावनूप्रातिपदिकेनाकानदिसिष्टेनवत

द्धितेन॥ संबंधोपितत्रैवार्थेगृहीतं॥ सस्यामानाधिकरणाच्चशेषात्मीयोपसर्जनयुक्तमष्टाक५पालादं विशेषणत्वेननत्रैवांतर्गतं॥ अद्यस्यवाद्यत्वेननवनमानाव्यमानस्यनसिध्यतीतिनदाक्षिप्तावनापिनत्रैव॥ नचद्यागेनविनाआग्नेयत्वंनावयितुंशक्यमितिपुरुषव्यापारविशेषोपियास्मृतदंतर्गतः॥ ननश्चनहिनांनपदोपात्ताष्टविधिनासर्वमन्यदर्थादाक्षिप्यमाणंननवाक्यंनिनत्ति॥ नावनाविधिद्वर्वकश्चसर्वंनधात्वर्थकारकविधिर्नवनीम्रूयमाणंपिसेवनावद्विशिष्टविधीयते॥ ननेविशेषणाद्यद्यानुपपत्त्या॥ सर्वसंसर्गात्मकत्वाच्चनामैवसंबंधराष्टेनाभिधत्ते॥ यत्तव्यापारात्मकात्वान्नद्रव्यदेवनासुबधत्राक्षणोविधातुं॥ अग्नियागादिसंज्ञाहिपदहेतुः नचेदम्पेनेसयानुपपत्तिश्रारणंनिधानं॥ ॥वहिरोजपयोस्मृकाश्चेषादलानादनद्वयः॥ नामधेयप्रस्तावेसंभव्यनामसुनिमित्तंप्रत्यधिकरणत्रयमारभ्यते॥ तुल्यहेतुत्वान्पुरोडाशेप्युदाहृतः॥ तत्रशास्त्रस्यावत्तन्निमित्तत्वादितिघाज्यिकानांसंस्कृतेषुप्रधोमान्सावत्रिकत्वाद्विगीतत्वाच्चसंस्कारनिमित्ततात्छाद्विः पुरोडाशादिलोकेव्यवहारेणदृश्यते॥ तस्माद्यपदिवदेवात्रेषांसंस्कारहेतुना॥ तत्वाप्तिकुतः॥ एकदेशेपियादृष्टः शाष्टोजातिनिबंधनः॥ तदत्यागात्तस्यानिमित्तांतरकल्पना॥ यएलौकिकाः शाष्टाश्चएवैवैदिकास्तएवचामीघानथांशतिस्थितत्वाज्ञोकवसिद्धिप्रतिक्षेवदेयत्रैकदेशेपिजातिनिमित्तानानुसतेनतत्रघनैमित्तांतरशक्तिकस्यनासंस्कृतेघापिजातेर्घनषसंभवात्रनिमित्तनातिक्रमोनचाशोचक्रु॥ ततश्चशास्त्रसूत्रविरोधा

अवाधश्च किंच॥ वैदिकेपि च संस्कारे तूत्पत्तौ वल्गवनादिकानु॥ नहि धौजातिरादृष्टत्वमाश्रित्य शौक्लसंपन्नं॥ तेनजा
तिमेतेनव्यक्तिं चरंति अभिव्यक्तिं चरंतिनुसंस्कारान्॥ अविहितत्वान्॥ लोकव्यवहारवेद्यायांसंस्काराणामना
वानवद्यायाहितुल्यत्वमन्यत्रापपत्तितः॥ लोकादव्युत्पन्नाथास्त्वेद्यगत्यातथाश्रितः॥ यदिहि
दनविधिवलायांबंधनविधौवाकश्चिद्गोकिंकोर्थेतस्मात्ततः किमेवस्थितंवचनेनाव्यक्तिविपर्ययेण
कल्प्यतेयाछिद्यतेसनूनंनपश्यति॥ अथैतवहिरादर्गतिस्तस्मादतुल्यता॥ प्रोक्षणीयशब्दसंयोगात्॥ न
नुसमुदायप्रसिद्धेः कृतिस्थानीयत्वाद्वाक्यस्थानीयाअवयवप्रसिद्धिर्वर्जास्यान्॥ नथाहिब्रह्म
रेरेवकुर्यंतेसमुदायप्रसिद्धिषु॥ अथैनागोपसंहारादितरविप्रकृष्यते॥ सत्यमेवमेतत्॥ अवश्य
त्वक्यवाचामपिद्वार्थेशक्तिरश्रयणीयातदनाश्रयणेअवयवप्रसिद्धित्वाभावात्॥ तत्रच॥ असत्व
वयवार्थेषुयोन्यत्रार्थेप्रयुज्यते॥ नचानद्यान्यगतित्वेनसमुदाये प्रसिद्धिनिजध्वनिकादिसमुदाय
प्रसिद्धिरवयवप्रसिद्धिंवाधते॥ तस्माच्चात्मनानोर्वचप्रमाणांतरेणदृष्टंवाधुनावयवार्थरहितेर्थेयथो
गोदूरुपनेयथाश्वस्वकर्णत्वरहितेदृष्टेश्वकर्णत्वादृष्टस्य॥ नद्यत्रदृष्टंशास्त्रमनुसारेणप्रतीतिंनुपपद्यतेइ
त्यर्थापत्त्याशास्त्रांतरकल्प्यते॥ ततश्चानयासंबंधः वयवार्थेनुसंधानात्तद्विशिष्टायांचावयवार्थप्रसिद्ध
ःअक्षरश्रवणमात्रजन्यत्वादिर्थेबलीयसीभवति॥ अत्रपुनरुपक्रमेवचनक्रियाकारणत्वसंभवा
दवयवशक्तिरेववाक्यवत्प्रयोगोपपत्तेः शास्त्रांतरप्रमाणकात्समुदायप्रसिद्ध्यभावः॥ तथाहिब्रह्म

वेतांयदिहस्तेषुवाजिकर्णेकिंयंचनश्रुष्टांसमुद्रास्पर्शेकेःअक्रियाहुकल्प्येयेत्॥ तस्मात्समुदायप्रसिद्धिरिनिम
वयवमात्रसाधारणत्वा॥ ८ नतुसंस्कारनिमित्तत्वेप्यामानाधिकरणेकृतत्वादीकारस्यश्रुतार्थवृत्तिः
स्यात्॥ यदिहिप्रागीकारात्संस्कारनिमित्तताभंग्येतततः स्त्रीप्रत्ययोयमाश्रयलिंगनिमित्तइत्यवधार
णादन्यलिंगान्निवर्त्तेत॥ अयंपुनरनूद्यप्रयोगः संस्कारेष्टीकरांतुएवानूद्यगतविशेषागोवेधादिवद्युक्त
इत्यस्यादृश्यस्यवाचकत्वंनावधार्यतेनस्यादीकारांतः स्यात्॥ यौगिकत्वेतुप्रागीकारान्नयोगोगम्यतइ
त्यीप्रत्ययोयंनिमित्तान्नाबाधतेनप्रयोक्ष्यतेचोदकप्राप्तंतुप्रतिपदिकमात्रंप्रयोक्तव्यं॥ नचकृत्येक्ष
र्थसमवायान्नविधिराष्टप्रयोगनियमोयतः प्रोक्षणाद्यदृष्टार्थेनजातिपक्षावतानृतेनमित्तेवप्रयोगः स्यात्
नथानिष्टेः॥ ९ निमंत्र्येपिदृष्टार्थेकरणवज्जातिसंस्कारनिमित्तपक्षाबुत्थानंतरेणयोगिकत्वंसाधनीयं
वैद्युतास्मिन्यातोन्यसूर्यकांतादिजन्यनांतिदृष्टौबहिरिनार्थः सन्निमंत्र्यान्निनवः कृयं॥ लोकेकर्मार्थलक्ष
णमित्यशास्त्रार्थेनापिव्यवहारोवेदेचिरनिर्दग्धेनप्रतीतिः॥ सर्वत्रनाचनवर्गीनविकारत्वात्तुनूक्ष
नेरविरनिर्दग्धनवर्गीनार्थेनास्यात्॥ इहतुशास्त्रंप्रमाणकंक्रियाजनिवृत्तिमात्रचरितार्थानिमंत्र्य
शास्त्रश्चिरंविरोधोपादानासमर्थः कथमविर॥

23